योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ३२

द्वात्रिंशः सर्गः ३२

श्रीवाल्मीकिरुवाच ।

वदत्येवं मनोमोहविनिवृत्तिकरं वचः ।

रामे राजीवपत्राक्षे तस्मिन्राजकुमारके ।। १

सर्वे बभूवुस्तत्रस्था विस्मयोत्फुल्ललोचनाः ।

भिन्नाम्बरा देहरुहैर्गिरः श्रोतुमिवोद्धुरैः ।। २

विरागवासनापास्तसमस्तभववासनाः ।

मुहूर्तममृताम्भोधिवीचीविलुलिता इव ।। ३

ता गिरो रामभद्रस्य तस्य चित्रार्पितैरिव ।

संश्रुताः श्रृणुकैरन्तरानन्दपदपीवरैः ।। ४

वसिष्ठविश्वामित्राद्यैर्मुनिभिः संसदि स्थितैः ।

जयन्तधृष्टिप्रमुखैर्मन्त्रिभिर्मन्त्रकोविदैः ।। ५

नृपैर्दशरथप्रख्यैः पौरैः पारशवादिभिः ।

सामन्तै राजपुत्रैश्च ब्राह्मणैर्ब्रह्मवादिभिः ।। ६

तथा भृत्यैऽरमात्यैश्च पञ्जरस्थैश्च पक्षिभिः ।

क्रीडामृगैर्गतस्पन्दैस्तुरंगैस्त्यक्तचर्वणैः ।। ७

कौसल्याप्रमुखैश्चैव निजवातायनस्थितैः ।

संशान्तभूषणारावैरस्पन्दैर्वनितागणैः ।। ८

उद्यानवल्लीनिलयैर्विटङ्कनिलयैरपि ।

अक्षुब्धपक्षततिभिर्विहङ्गैर्विरतारवैः ।। ९

सिद्धैर्नभश्चरैश्चैव तथा गन्धर्वकिन्नरैः ।

नारदव्यासपुलहप्रमुखैर्मुनिपुङ्गवैः ।। १०

अन्यैश्च देवदेवेशविद्याधरमहोरगैः ।
रामस्य ता विचित्रार्था महोदारा गिरः श्रुताः ।। ११
अथ तूष्णीं स्थितवति रामे राजीवलोचने ।
तस्मिन्रघुकुलाकाशशशाङ्के शशिसुन्दरे ।। १२
साधुवादगिरा सार्धं सिद्धसार्थसमीरिता ।
वितानकसमा व्योम्नः पौष्पी वृष्टिः पपात ह ।। १३
मन्दारकोशविश्रान्तभ्रमरद्वन्द्वनादिनी ।
मधुरामोदसौन्दर्यमुदितोन्मदमानवा ।। १४
व्योमवातविनुन्नेव तारकाणां परम्परा ।
पतितेव धरापीठे स्वर्गस्त्रीहसितच्छटा ।। १५
वृष्यमूककचन्मेघलवावलिरिव च्युता ।
हैयंगवीनपिण्डानामीरितेव परम्परा ।। १६
हिमवृष्टिरिवोदारा मुक्ताहारचयोपमा ।
ऐन्दवी रश्मिमालेव क्षीरोर्मीणामिवाततिः ।। १७
किञ्जल्काम्भोजवलिता भ्रमद्भृङ्गकदम्बका ।
सीत्कारगायदामोदिमधुरानिललोलिता ।। १८
प्रभ्रमत्केतकीव्यूहा प्रस्फुरत्कैरवोत्करा ।
प्रपतत्कुन्दवलया चलत्कुवलयालया ।। १९
आपूरिताङ्गणरसा गृहाच्छादनचत्वरा ।
उद्ग्रीवपुरवास्तव्यनरनारीविलोकिता ।। २०
निरभ्रोत्पलसंकाशव्योमवृष्टिरनाकुला ।
अदृष्टपूर्वा सर्वस्य जनस्य जनितस्मया ।। २१
अदृश्याम्बरसिद्धौघकरोत्करसमीरिता ।
सा मुहूर्तचतुर्भागं पुष्पवृष्टिः पपात ह ।। २२
आपूरितसभालोके शान्ते कुसुमवर्षणे ।
इमं सिद्धगणालापं शुश्रुवुस्ते सभागताः ।। २३

आकल्पं सिद्धसेनासु भ्रमद्भिरभितोदिवम् ।
अपूर्वमिदमस्माभिः श्रुतं श्रुतिरसायनम् ।। २४
यदनेन किलोदारमुक्तं रघुकुलेन्दुना ।
वीतरागतया तद्धि वाक्पतेरप्यगोचरम् ।। २५
अहो बत महत्पुण्यमद्यास्माभिरिदं श्रुतम् ।
वचो राममुखोद्भूतं महाह्लादकरं धियः ।। २६
उपशमामृतसुन्दरमादरा
दधिगतोत्तमतापदमेष यत् ।
कथितवानुचितं रघुनन्दनः
सपदि तेन वयं प्रतिबोधिताः ।। २७
इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे नभश्चरसाधुवादो नाम द्वात्रिंशः सर्गः ।। ३२ ।।